CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
5D.P.13
Coll. No. 177

Title Śāsātikā a

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 177 Subject: Tantra

Title: 'Sāradātilaka.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9-3" by 4·6" Extent: 23 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: incomplet. ends abruptly.

।।गेकं कृतं धनुःखंडमिवाहिविद्विषः ।।२७।। विपांडु संव्यानमिवानिलोद्धतं निरुंध
ीः सप्तपलाशजं रजः ।। अनाविलोन्मिलितबाणचक्षुषः सपुष्पहासा वनराजि
योषितः ।।२८।। अदीपितं वैद्युतजातवेदसा सितांबुदस्थापिततांबुरच्छदैः तिरोहिता
धीजनग्मामं ।। हेसोभीतनोहरैः किंमुहुर्दधे हं ।। संकल्प किंकंपमेस्थांत घ्वं घस्थिश्रीस्वयंपुयामवनि
निकुलोत्तंसवंवा । उमाकांतश्चमरेश्वरैयहिता । कोधीश ।।

॥ ॥ ॥श्रीसारदायैनमः॥ ॥नित्यानंदवपुर्निरंतरगलत्पंचाशदर्णैः क्रमाद्व्याप्तं येन
चराचरात्मकमिदं शब्दार्थरूपं जगत्॥ शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमंतर्गतं त
द्वोव्यादनिशं शशांकसदनं वाचामधीशं महः॥१॥ अंतस्मितोच्छसितमिंदुकलावतंस
मिंदीवरोदरसहोदरनेत्रशोभि॥ देवत्रिलोकविनवस्यनवेंदुमौलेरंतःपुरं दिशतु मंग
लमादराद्वः॥२॥ संसारसिंधोस्तरणैकहेतुं वंदे गुरून्श्रीद्विरिशिवस्वनाथान्॥ रजांसिये
षांपदपंकजानां तीर्थाभिषेकश्रियमावहंति॥३॥ सारं वक्ष्यामि मंत्राणां सारदातिल
कं स्फुटं॥ धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणं॥४॥ शब्दार्थसृष्टिमुनिभिःछंदो
निर्दैवतैः सह॥ विधिश्च मंत्रयंत्राणां तंत्रेस्मिन्नभिधीयते॥५॥ निर्गुणः सगुणश्चेशिवो
ति

ज्ञेयः सनातनः॥ निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः॥६॥ सच्चिदानंदविभवात्सकला
त्परमेश्वरात्॥ आसीच्छक्तिस्ततो नादो नादाद्बिंदुसमुद्भवः॥७॥ परःशक्तिमयः साक्षात्त्रिधा
सौभिद्यते पुनः॥ बिंदुर्नादो बीजमिति तस्य भेदाः समीरिताः॥८॥ बिंदुः शिवात्मको बीजं
शक्तिर्नादस्तयोर्मिथः॥ समवायः समाख्यातः सर्वागमविशारदैः॥९॥ रौद्री बिंदोस्ततो
ज्ये नादो ष्ठाबीजाद्जायत॥ वामाताभ्यः समुत्पन्ना रुद्रब्रह्मराधिपाः॥१०॥ ते ज्ञानेच्छाक्रि मा
यात्मानो वह्नींदर्कस्वरूपिणः॥ भिद्यमानात्पराद्बिंदोरव्यक्तात्मा रवोभवत्॥११॥ शब्दब्रह्मेति
तं प्राहुः सर्वागमविशारदाः॥ शब्दब्रह्मेति शब्दार्थं शब्दमित्यपरे विदुः॥१२॥ न हि तेषां तयोः
सिद्धिर्जडत्वादुभयोरपि॥ चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिः॥१३॥ तत्प्राप्य कुंडली

रूपंप्राणिनांदेहमध्यगं॥ वर्णात्मनाविर्भवतिगद्यपद्यादिभेदतः॥१४॥ अथविंद्वात्मनःशं
भोःकालबंधोःकलात्मनः॥ अजायतजगत्साक्षीसर्वव्यापीसदाशिवः॥१५॥ सदाशिवाद्भ
वेदीशस्ततोरुद्रसमुद्भवः॥ ततोविष्णुस्ततोब्रह्मातेषामेवंसमुद्भवः॥१६॥ मूलभूतात्ततो
व्यक्ताद्विकृतात्परवस्तुनः॥ आसीत्किलमहत्तत्वंगुणांतःकरणात्मकं॥१७॥ अभूत्तस्मा
दहंकारस्त्रिविधःसृष्टिभेदतः॥ वैकारिकादहंकाराद्देवावैकारिकादश॥१८॥ दिग्वातार्कप्र
चेतोश्विवह्नींद्रोपेंद्रमित्रकाः॥ तैजसादिंद्रियाण्यासंस्तन्मात्राक्रमयोगतः॥१९॥ भू
तादिकादहंकारात्पंचभूतानिजज्ञिरे॥ शब्दाद्भूद्वियत्स्पर्शाद्वायुरूपाद्धुताशनः॥२० २
रसादंभःक्षमागंधादितितेषांसमुद्भवः॥ स्वच्छंवियन्मरुत्कृष्णोरक्तोग्निर्विशदंपयः

॥२१॥ पीताभूमिःपंचभूतान्येकैकाधारतोविदुः॥ शब्दस्पर्शरूपरसगंधाभूतगुणाःस्मृताः॥२२
वृत्तंदिवस्तत्षड्बिंदुलांछितंमातरिश्वनः॥ त्रिकोणंस्वस्तिकोपेतंवह्नेरर्द्धेंदुसंयुतं॥२३॥
अंभोजमंभसोभूमेश्चतुरस्रंसवज्रकं॥ तत्तद्भूतस्यमानानिमंडलानिविदुर्बुधाः॥२४
वर्णैस्त्वैरंचितान्याहुःस्वस्वनामाढ्यान्यपि॥ धरादिपंचभूतानांनिवृत्त्याद्याःकलाःस्मृताः॥
निवृत्तिःसप्रतिष्ठास्याद्विद्याशांतिरनंतरा॥ शांत्यतीतेतिमाज्ञेयानादेहसमुद्भवाः॥२६
पंचभूतात्मकंसर्वंचराचरमिदंजगत्॥ अचराबहुधाभिन्नागिरिवृक्षादिभेदतः॥२७॥ चरा
स्त्रिविधाज्ञेयास्स्वेदांडजजरायुजाः॥ स्वेदजाःकृमिकीटाद्याअंडजाःपन्नगादयः॥२८॥ ज
रायुजामनुष्याद्यास्तेषुनृणांनिगद्यते॥ उद्भवःपुंस्त्रियोर्योगेशुक्रशोणितसंयुतात्॥२९

विंदुरेकोविशेद्गर्भंभुक्तयात्माक्रमादसौ॥रजोधिकेत्वेवनारीन्वेद्रेतोधिकःपुमान्॥३०॥
पूर्वकर्मानुरूपेणमोहपाशेनयंत्रितः॥कश्चिदात्मांतरेतस्मिन्जीवभावंप्रपद्यते॥३१॥अ
थमात्राहृतैरन्नपानाद्यैःपोषितःक्रमात्॥दिनानुपक्षांस्ततोमासाननुवर्द्धतेतत्वदेवां
न्॥३२॥दोषैर्दूष्यैःसुखंप्राप्तोव्यक्तिंयातिनिजेंद्रियैः॥वातपित्तकफादोषादूष्याःस्युस
प्तधातवः॥३३॥त्वक्रक्तमांसमेदोस्थिमज्जाशुक्राणिनाम्विदुः॥ज्ञानेंद्रियाणिश्रोत्र
६क त्वक्चक्षुर्जिह्वानासिकाविदुः॥३४॥ज्ञानेंद्रियार्थाःशब्दाद्यास्स्मृताःकर्मेंद्रियाण्यपि॥वाक्पाणि
पादपायूपस्थान्याहुर्मनीषिणः॥३५॥वदनादानगतयोविसर्गानंदसंयुताः॥कर्मेंद्रिया ३
र्थाःसंप्रोक्ताअंतःकरणमात्मनः॥३६॥मनोबुद्धिरहंकारश्चित्तंचपरिकीर्तितं॥दशेंद्रिया

---

णिभूतानिमनसासहषोडश॥विकारास्युःप्रकृतयःपंचभूतान्यहंकृतिः॥अव्यक्तंमहदित्यष्टौत
स्मात्तांश्चमहानपि॥३७॥साहंकाराविकृतयःसप्ततत्वविदोविदुः॥अग्नीषोमात्मकोदेहोबिं
दुर्यदुभयात्मकः॥३८॥दक्षिणांशस्मृतःसूर्योवामभागोनिशाकरः॥नाड्योदशविदुस्ता
सुमुख्यास्तिस्रःप्रकीर्तिताः॥इडावामेतनोर्मध्येसुषुम्नापिंगलापरे॥मध्येतास्वपिनाडीस्या
त्अग्नीषोमस्वरूपिणी॥गांधारीहस्तिजिह्वाख्यासपूषालंबुस्सामता॥यशस्विनीशंखि
नीचकुहूःस्युसप्तनाडिकाः॥नाड्योनंताःसमुत्पन्नास्सुषुम्णापंचपर्वसु॥मूलाधारोत्थि
तप्राणास्तानिव्याप्नोतितनुं॥वायवोत्रदशप्रोक्तावक्ष्यस्वदशस्मृताः॥प्राणाद्याम
रुतःपंचनागकूर्मोधनंजयः॥४४॥कृकलस्याद्देवदत्तइतिनामभिरीरिताः॥अन्ययो

दोषदूष्येषुसंलीनादेशदेहिनः॥४५॥बुभुक्षाचपिपासाचप्राणस्यमनसःस्मृतौ॥शोकमो
हौशरीरस्यजरामृत्यूषडूर्मयः॥४६॥स्नायवस्थिमज्जनःशुक्रत्वक्श्रायांत्राणिशोणितान्
षाट्कौशिकमिदंप्रोक्तंसर्वदेहेषुदेहिनां॥४७॥इत्थंद्वैतस्तथागत्वेद्विर्जन्मस्तुनास्तुवं॥
स्मरंस्तिष्ठतिदुःखात्माछिन्नदेहोजरायुणा॥४८॥कालक्रमेणप्रसृतिस्तुमातरंक्लेशयत्यपि
सापिंडितशरीरोथजायतेयमवासुखः॥४९॥हलग्नंतिष्ठतिनिश्चेष्टोजीत्यागेनमिछ
ति॥ततश्चैतन्यरूपास्यासर्वगाविश्वरूपिणी॥५०॥शिवस्यंनिधिमास्याद्यनित्यानंदगुणोद
या॥द्विकालाद्यनवच्छिन्नासर्वदेहार्थगास्तुता॥५१॥परापरविभागेनपरशक्तिरियंस्मृता॥यो
गिनांहृदयांभोजेनृत्यंतीनित्यमंजसा॥५२॥आधारेसर्वभूतानांस्फुरंतीविद्युदाकृति

द्विचत्वारिंशदक्षलिमापंचाशद्वर्णरूपिणी॥२
शंखावर्तक्रमाद्देवीसर्वमावृत्यतिष्ठति॥५३॥कुंडलीभूतसर्पाणामंगश्रियमुपेयुषी॥सर्व
देवमयीदेवीसर्वमंत्रमयीशिवा॥५४॥सर्वतत्त्वमयीसाक्षात्सूक्ष्मात्सूक्ष्मतराविभुः॥त्रिधाम
जननीदेवीशब्दब्रह्मस्वरूपिणी॥५५॥गुणितासर्वगात्रेणकुंडलीसर्वदेवता॥विश्वात्मना
प्रबुद्धात्मासूतेमंत्रमयंजगत्॥५६॥एकधागुणिताशक्तिःसर्वविश्वप्रवर्तिनी॥वेदादिबीजंश्रीबी
जंशक्तिबीजंमनोभवं॥५७॥प्रासादंतुंबरंपिंडंचिंतारत्नंगणेश्वरं॥मार्त्तंडभैरवंदौर्गंनारसिं
हंवराहजं॥५८॥वासुदेवंहयग्रीवंबीजंश्रीपुरुषोत्तमं॥अन्यान्यपिचबीजानिततोत्पादय
तिध्रुवं॥५९॥यदास्रवतिसास्वोविद्विगुणीकृतविग्रहा॥हंसवर्णौपरात्मानौराद्यौपौविमस
रूपौ॥६०॥सृजत्येषापरादेवीवदाप्रकृतिपूरुषौ॥यद्यदन्यजगत्यस्मिन्नुयुग्मंतत्तदजा

यत॥६१॥त्रिगुणीत्नतमवांभी विद्रुपाशिवगेहिनी॥प्रस्तुतेत्रैपुरं मंत्रं मंत्रंशक्तिविनायकं॥६२॥
पाशादित्र्यक्षरं मंत्रं त्रैलं चंद्रनायकं॥ सौरं मृत्युंजयंशक्तिं शांभवं विनतास्तुतं॥६३॥ वागीशी त्र्यक्ष
रं मंत्रं नीलकंठं विषापहं॥ यंत्रं त्रिगुणितं देव्या लोकत्रयगुणत्रयं॥६४॥ धामत्रयं स्यावेदानां त्रयं
वर्णत्रयं त्रयी॥ त्रिपुष्करं स्वरं देवी ब्रह्मादीनां त्रयं त्रयं॥६५॥ वह्निः कालत्रयं शक्तेस्त्रयं दृष्टित्रि
यं महत्॥ नाडीत्रयं त्रिवर्गः स्याद्यदन्यत्त्रिधामतं॥६६॥ चतुःप्रकारगुणिता नाशांभवी शमेत
यिनी॥ तदानीं पशिनी बंधो करोति चतुरक्षरं॥६७॥ चतुरस्रं महादेव्या देवी तत्त्वचतुष्टयं॥ च
तुरः स्यागगनं तं करणानां चतुष्टयं॥६८॥ सृष्ट्यादीश्चतुरो भागा विस्तोर्मूर्त्तिचतुष्टयं॥ ५
चतुष्टयं गणेशानामात्मादीनां चतुष्टयं॥६९॥ तु[illegible]ष्ट[illegible]का[illegible]कंधमदीनां चतुष्टयं
ग दि पीठ

ज्ञान
दमकादीनु गणादेवीय यदन्यच्चतुष्टयं॥७०॥ पंचधा गुणिता पत्नी शंभोः सर्वार्थदायिनी॥ त्रिपुरा
पंचकूटं स्यात् नस्याः पंचाक्षरद्वयं॥७१॥ पंचरत्नं महादेव्याः सर्वकामफलप्रदं॥ पंचाक्षरं महेश
स्य पंचवर्णा गिरः स्मनः॥७२॥ संमोहनान्यपंचबाणास्ते कामान्यं चक्षुरक्रमात्॥ पंचप्राणादिकोवा न
युर्न्यं पंचवर्णान्त्रिदेशितः॥७३॥ मूर्त्तिः पंचकलाः पंचपंचब्रह्मस्तचक्रमात्॥ सृजत्येषा पराशक्ति
र्वै देवेदार्यरूपिणी॥७४॥ षोढा स्यागुणितां देवी धत्ते मंत्रं षडक्षरं॥ षट्कूटं त्रिपुराख्यं तं गण
पत्यं षडक्षरं॥७५॥ षडक्षरं स्मिन् रुचेन्नरि मिंहं षडक्षरं॥ स्कंदं नवमं तमुरव्यान् षट्कूर्मो दादीनु गणा
धिपान्॥७६॥ कोशानू[illegible]मीदनानू शाक्तीत्राकिन्याद्याः षडध्वनः॥ यंत्रं षट्गुणितं शक्तेः षडाधा
रान्निजेत्॥७७॥ षड्विधं यज्जगत्यस्मिन्नस्य वेत्तन्परमेश्वरी॥ सप्तधा गुणिता नित्या शंकरा

ईशरीशिणी।।७८।।सप्तार्णंत्रिपुरामंत्रंसप्तवर्णंविनायकं।।व्याहृतीनांसप्तकंचसप्तवर्णंसुद
र्शनं।।७९।।लोकान्गिरीन्स्वरान्धातून्मुनीन्द्वीपान्समुद्रानपि।।समिधःसप्तसंख्याताःसप्तजिह्विका
हविर्भुजः।।८०।।अन्यस्सप्तविधंय[illegible]घत्तैस्या[illegible]मजायत।।अष्टधागुणिताशक्तिमेवम
ष्टाक्षरद्वयं।।८१।।विष्णोश्रीकरनामानंमंत्रमष्टाक्षरंपरं।।अष्टाक्षरंरुद्रेशशक्तेरष्टाक्षरयुगं
परं।।८२।।नमोरष्टाक्षरंब्रौगर्भमष्टार्णंपरमात्मनः।।अष्टार्णंनीलकंठस्यवासुदेवात्मकंमनुं।।
८३।।यंत्रंकामार्गलंदिव्यंदेवीयंत्रंघटार्गलं।।गंधाष्टकंश्रुतंदेवीदेवानांहृदयंगमं।।८४।।ब
लाद्यान्भैरवान्सर्वान्मूर्त्तीराशावसूनपि।।अष्टपीठंमहादेव्याअष्टाष्टकसमन्वितं।।८५
अष्टौचाप्रकृतिर्विघ्नवक्रतुंडादिकान्क्रमात्।।अणिमादिगुणान्नागान्वह्नेर्मूर्त्तीर्यमादि

मातृकान्।।८६।।अष्टात्मकंजगत्यन्यत्सर्वंवितनुतेसदा।।गुणितानवधादेव्यास्तेमंत्रंनवात्मकं
।।८७।।नवकंशक्तितत्त्वानांतत्त्वरूपामहेश्वरी।।नवकंपीठशक्तीनांशृंगारादीन्रसान्नव।।८८।।
माणिक्यादीनिरत्नानिनवग्रहयुतानिसा।।नवकंप्राणवृत्तीनांमंडलंनवकंतुयत्।।८९।।यस्यंनवा
त्मकंलोकेसर्वमस्त्यांवदंतिच।।दशधाविघ्ननाशंचोजाविनीनवदुःखहा।।९०।।दशाक्षरंगणपतेः
त्वरितायादशाक्षरं।।दशाक्षरंस्मरस्यैवत्वायच्छिन्नायाश्चदशाक्षरं।।९१।।वासुदेवात्मकंमंत्रंअश्वारू
ढंदशाक्षरं।।नीलापद्मावतीमंत्रंराममंत्रंदशाक्षरं।।त्रिपुरांदशाकूटंसोत्रिपुरायादशाक्षरं।।
दशकंशक्तितत्त्वानांतत्त्वरूपामहेश्वरी।।९३।।नाडीनांदशकंविष्णोःअवतारादशक्रमात्।।दशकं
लोकपालानांयद्यदन्यत्तुतज्जत्समो।।९४।।एकादशाक्षमार्सविष्णुणिनामाजगन्मयी।।रुद्रैका

दर्शनीमायांशक्तेरेकादशाक्षरं॥९५॥एकादशाक्षरंवागपारूढानेकादशाक्रमात्॥मस्तुक्लिरिति
मवर्णगुणिताद्वादशाक्रमात्॥९६॥नित्यामंत्रंमहेशानांवासुदेवात्मकंमनुं॥शारानूनान्तु
हरेर्मंत्रोयंत्रंस्याद्वादशात्मकं॥९७॥अन्यदेतादृशंसर्वंपंचदस्यामजायत॥चतुर्विंशतितत्वा
त्मायदानवतिशोत्तना॥९८॥गायत्रींसवितुःशंभोर्गायत्रींमदनात्मकां॥गायत्रीविष्णुगायत्री
गायत्रीत्रिपदात्मनः॥९९॥गायत्रींदक्षिणामूर्तेर्गायत्रीमं[illegible]नुयोषितः॥चतुर्विंशतितत्वा॥
नितस्यामामंनरात्मनि॥१००॥द्वात्रिंशद्धिदगुणितासर्वमंत्रमयीविष्णुः॥सतोमृत्युंजयंमंत्रंना
रसौहंसहामनुं॥१॥लवणाद्यमनुंमंत्रंचकरूणास्यमहात्मनः॥हयग्रीवंमनुंहौंगंवाराहंवह्नि
नायकं॥२॥गणेशितुर्महामंत्रंमंत्रमन्त्राधिपस्यच॥मंत्रंश्रीदक्षिणामूर्तेर्मालामंत्रंमनोर्भु

रस्यं
वः॥३॥त्रैपुरंभुवनवासिन्याश्चघोरा[illegible]महामनुं॥नडकालीमनुंलक्ष्म्यामालामंत्रंपमात्म
कं॥४॥मंत्रंस्यादेवकीसूनोर्मंत्रंश्रीपुरुषोत्तमं॥श्रीगोपालंमनुंरमेर्मंत्रंनारामनुक्रमा
त्॥५॥महामंत्रंमहालक्ष्म्यामंत्रंत्रतेश्वरस्यस्ता॥क्षेत्रपालात्मकंमंत्रंमंत्रंमापन्निवारणं॥
६॥स्रतेमातंगिनींविद्यांक्षिप्रविद्यांशुभोदयां॥अनेकक्रमयोगेनगुणिताशिववद्धना॥७॥
षट्त्रिंशतंचतत्वानिशैवानिरचयत्यसौ॥अन्यान्मंत्राश्चयंत्राणिशुभदानिप्रसूयते॥८॥
द्विचत्वारिंशतामूलेगुणिताविश्वनायिका॥मापसूतेॐऽनिनं[illegible]ब्रह्ममयीविष्णुः॥९॥श
क्तितत्तोधनिस्तस्मानूनादस्तस्मान्निरोधका॥ततोर्द्धेन्दुस्ततोबिंदुस्तस्माद्दासीत्परात्परः॥१०॥
पश्यंतीमध्यमावाचोवैखरी[illegible]जन्मभूः॥इच्छाज्ञानक्रियात्मासौतेजोरूपागुणात्मिका॥११॥
द्रू

क्रमेणानेन सृजति कुंडलीवर्णमालिकां॥ अकारादिक्षकारांताद्विचत्वारिंशदात्मकान्॥१२॥
पंचाशद्वारगुणितापंचाशद्वर्णमालिकां॥ एतेन वर्णितोभिन्नान्कलारुद्रादिकान् क्रमात्॥
१३॥ निरोधिकान्नवेदक्षिअर्द्धेंदुस्यांनिशाकरः॥ अकस्यादुनयोर्योगोबिंद्वात्मातेजसांनिधिः॥
१४॥ ज्ञानावरणयितोबिंदोःशिवशक्तिमयादभूः॥ अग्नीषोमात्मकास्तेस्युःशिवशक्तिमयाद्रवेः॥
१५॥ येनसंजवमापन्नोसोमसूर्याग्निरूपिणः॥१६॥ ॥ ॥इतिश्रीसारदातिलकेप्रथमःपटल
॥ ॥ ॥छ॥ ॥ततोव्यक्तिंप्रवक्ष्यामिवर्णानांवह्निनेरणां॥ प्रेरितामरुतानित्यंसुषुम्ना
रंध्रनिर्गताः॥१॥ कंठादिकरणैर्वर्णाःक्रमादाविर्भवंतिते॥ एषांस्वरगंस्मृताःसौम्याःस्पर्शाः
शौराःस्मृतोद्याः॥२॥ आग्नेयाव्यापकाःसर्वेसोमसूर्याग्निदेवताः॥ स्वराःषोडशविख्यातास्प

---

| वा· | अ· | भू· | ज· | आ |
|---|---|---|---|---|
| अ | इ | उ | ऋ | ऌ |
| आ | ई | ऊ | ॠ | ॡ |
| ए | ऐ | ओ | औ | अं |
| क | ख | ग | घ | ङ |
| च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण |
| त | थ | द | ध | न |
| प | फ | ब | भ | म |
| य | र | ल | व | श |
| ष | ह | ळ | स | ह |

र्णास्तिपंचविंशतिः॥३॥ तत्वात्मानस्मृताःस्पर्शामकारःपुरुषोयतः॥ व्यापकादशतेकामधनधर्मप्र
दायिनः॥४॥ ह्रस्वःस्वरेषुपूर्वोक्तःपरोदीर्घःक्रमादिमे॥ शिवशक्तिमयास्तेस्युःबिंदुसर्गविसर्गान्ताः
॥५॥ बिंदुःपुमान्रविःप्रोक्तःसर्गःशक्तिर्निशाकरः॥ स्वराणांमध्यगंपत्रचतुष्कंतुनपुंसकं॥६॥ पिं
गलायांस्थिताह्रस्वाइडायांसंगताःपरे॥ सुषुम्णामध्यगाश्चैपाश्चत्वारोयेनपुंसकाः॥७॥ विनास्व
रैस्तेनान्येषांजायतेव्यक्तिरंजसा॥ शिवशक्तिमयान्प्राहुस्तस्माद्वर्णान्मनीषिणः॥८॥ कारणींपंच
भूतानांउक्तामातृकायतः॥ ततोभूतात्मकावर्णाःपंचपंचविभागशः॥९॥ वाय्वग्निभूजलाका
शाःपंचाशल्लिपयःक्रमात्॥ पंचह्रस्वाःपंचदीर्घाबिंद्वंताःसंधिसंभवाः॥१०॥ पंचशःकादयःषलल
सर्णातास्समीरिताः॥ सोमसूर्याग्नितेदेनमातृकावर्णसंभवाः॥११॥ अष्टत्रिंशत्कलास्तासुतमंडले

ष्टुव्यवस्थिताः॥अमृतामानदापूषातुष्टिपुष्टीरतिर्धृतिः॥२२॥शशिनीचंद्रिकाकांति ज्योत्स्नाश्रीःप्री
तिरंगदा॥पूर्णापूर्णामृतानाःकामदायिन्यःस्वरजाःकलाः॥२३॥तपनीतापनीधूम्रामरीचिर्ज्वालिनी
रुचिः॥सुषुम्नाभोगदाविश्वाबोधिनीधारिणीक्षमा॥२४॥कभाद्यावसुदाःसौराठडांताद्वादशेरि
ताः॥धूम्रार्चिरूष्माज्वलिनीज्वालिनीविस्फुलिंगिनी॥२५॥सुश्रीःस्वरूपाकपिलाहव्यकव्यवहे
पि॥यादीनांदशवह्नीनांकलाधर्मप्रदाइमाः॥२६॥अभयेष्टकराध्येयाश्वेतपीतारुणाक्रमात्॥ता
रस्यपंचरेखेत्र्यपंचाशद्वर्णगाःकलाः॥२७॥सृष्टिरृद्धिःस्मृतिर्मेधाकांतिर्लक्ष्मीर्द्युतिःस्थिरा॥स्थिति
सिद्धिरितिप्रोक्ताकचवर्गकलाक्रमात्॥२८॥अकाराद्ब्रह्मणोत्पन्नास्तप्तचामीकरप्रभाः॥एताःक
रधृताक्षस्रक्कंकरद्वयकुंडिकाः॥२९॥जरांचपालिनीशांतिऐश्वरीरतिकामिके॥वरदाह्लादिनीप्रीति

ख्वरिका १

कखगघङचछजझञटठ
नबफपनधद लडढ

५

शंख

दीर्घास्युष्टतवर्गजाः॥३०॥उकाराद्विष्णुनोत्पन्नातमालदलसन्निभाः॥अभीतिदरचक्रेष्टबाहवःप
रिकीर्तिताः॥३१॥तीक्ष्णारौद्राभयानिद्रातंद्राक्षुत्क्रोधिनीक्रिया॥उत्कारीमृत्युरेतास्युःकथिताः
पयवर्गजाः॥३२॥रुद्रेणमात्मादुत्पन्नाशरच्चंद्रनिभप्रभाः॥उदहंत्योन्नयंशूलंकपालंबाऊत्ति
वरं॥३३॥ईश्वरेणोद्भिताबिंदोःपीताश्वेताऽरुणाःसिताः॥अनंताचषवर्गस्थाजपाकुसुमसन्निभाः
॥३४॥अभयंहरिणंटंकंदधानांबाहुभिर्वरं॥निवृत्तिःस्यात्प्रतिष्ठास्याद्विद्यातिरनंतरं॥३५॥इं शां
धिकादीपिकाचैवरेचिकामोचिकापरा॥सूक्ष्मासूक्ष्मामृताज्ञानामृताचाप्यायिनीतथा॥३६॥व्या
पिनीव्योमरूपास्युःरनंतास्वरसंयुता॥सदाशिवेनसंजातानादाहेताहेताःसितत्विषः॥३७॥अ
क्षस्रक्पुस्तकगुणाकपालाढ्यकरांबुजाः॥न्यासमेतुयोजये [illegible] दाहोषोडशस्वरगाःकला॥

॥२८॥इतिपंचाशदाख्याताताकलांस्ववर्णसमृद्धिदाः॥ श्रीकंठोनंतसूक्ष्मौचत्रिमूर्तिरमरेश्वरः॥२९॥ अर्घी
शोभारभूतिश्चतिथीशःस्थाणुकोहरः॥ झिंटीशोभौतिकोसद्योजातश्चानुग्रहेश्वरः॥३०॥ अक्रू
रश्चमहासेनःषोडशस्वरमूर्तयः॥ पश्चात्क्रोधीशचंडीशपंचांतकशिवोत्तमाः॥३१॥ अथैकरु
द्रकूर्मैकनेत्राख्यचतुराननाः॥ अजेशःसर्वसोमेशौतथालांगलिदारुकौ॥३२॥ अर्धनारीश्वर
श्चोमाकांतश्चाषाढदंतिनौ॥ स्फुरत्त्रिमीनमेषाख्यालोहितश्चशिखीतथा॥३३॥ छगलंड
रव्य। द्विरंडेशौ महाकालाबालिनौ॥ [illegible] ॥भुजंगेशःपिनाकीशःखड्गीशाख्य च
कास्तथा॥३४॥ श्वेतस्त्वथाभृगुर्लकुलीशिवःसंवर्तकस्तथा॥ एतेरुद्राःस्मृतास्त्र्यक्षाधृतशूलकपालकाः॥३५॥ १०
पूर्णोदरीस्याद्विरजाशाल्मलीतदनंतरं॥ लोलाक्षीवर्तुलाक्षीचतथाविकृतमुखकी॥३६॥

सु:
ज्वालामुखीततोज्ञेयापश्चादुल्कामुखीस्मृता॥ सुश्रीमुखीचवि द्यामुख्येताःस्वरशक्तयः॥३७
महाकालीसरस्वत्यौसर्वसिद्धिसमन्विते॥ गौरीत्रैलोक्यविद्यास्यान्मंत्रशक्तिस्ततःपरं॥३८॥
आत्मशक्तिर्भूतमातातथालंबोदरीतिच॥ द्राविणीनागरीत्यखेचरीचापिमंजरी॥३९॥
रूपिणीवीरिणीपश्चात्कोटर्यपिचपूतना॥ स्याद्भद्रकालीयोगिन्यौशंखिनीगर्जिनीतथा॥४०
कालरात्रीचकुर्दिन्यौकपर्दिन्यपिवज्रया॥ जयाचसुमुखेश्वर्यारेवतीमाधवीततः॥४१॥ वा
रुणीवायवीप्रोक्तापश्चाद्रक्षोविदारिणी॥ ततश्चसहजालक्ष्मीव्यापिनीमाययान्विता॥४२
एतारुद्रांकपीठस्थापिंगारुणविग्रहाः॥ रक्तोत्पलकपालाभ्यांअलंकृतकरांबुजाः॥४३
केशवोनारायणोमाधवोगोविंदविष्णवः॥ मधुसूदनसंज्ञोन्यस्यात्त्रिविक्रमवामनो॥४४॥

श्रीधरश्च हृषीकेश पद्मनाभस्ततः परं॥ दामोदरो वासुदेवः संकर्षण इतीरिताः॥४५॥ प्रद्युम्नश्चानि
रुद्धश्च स्वराणां मूर्त्तयस्त्विमाः॥ पश्चाच्चक्री ग दी शार्ङ्गी खड्गी शंखी हली पुनः॥४६॥ मुशली शूलि
संयुक्त पाशी स्यादंकुशी पुनः॥ मुकुंदो नंदजो नंदी नरो नरकजित् हरिः॥४७॥ कृष्णः सत्यः सा
त्वतः स्यात् शौरिः शूरो जनार्दनः॥ भूधरो विश्वमूर्त्तिश्च वैकुंठः पुरुषोत्तमः॥४८॥ बली बला
नुजो बालो वृषघ्नश्च वृषः पुनः॥ हंसो वराहो विमलो नृसिंहो मूर्त्तयो हलां॥४९॥ केशवाद्या
स्त्वमी श्यामाश्चक्रशंखलसत्कराः॥ कीर्त्तिः कांतिस्तुष्टिपुष्टी धृतिः शांतिः क्रियादया॥५०॥ मेधाप्र
हर्षा श्रद्धा स्याल्लज्जा लक्ष्मी सरस्वती॥ प्रीती रती रमा प्रोक्ता क्रमेणस्वरशक्तयः॥५१॥ जया ११
दुर्गा प्रभा सत्या चंडा वाणी विलासिनी॥ विजया विरजा विश्वा विनंदा सुनदा स्मृतिः॥५२॥

---

सिद्धिः समृद्धिः शुद्धिः स्यात् भुक्तिर्मुक्तिर्मतिः क्षमा॥ रमोमा क्लेदिनी क्लिन्ना वसुधा वसुदा परा
॥५३॥ परापरायणा सूक्ष्मा संध्या प्रज्ञा प्रभा निशा॥ अमोघा विद्युता चेति मूर्त्यधिपाः स
र्वकामदाः॥५४॥ एतास्प्रियतमांगेषु निषण्णाः सुस्मितानना॥ विद्युद्दामसमाभानां गंधःपंक
जाभयबाहवः॥५५॥ मातृकावर्णनिर्दिष्टाः सर्वे मंत्राः प्रजज्ञिरे॥ मंत्रविद्याविभागेन द्विविधा
मंत्रजातयः॥५६॥ मंत्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः स्मृताः॥ पुंस्त्रीनपुंसकात्मानो मं
त्राः सर्वे समीरिताः॥५७॥ पुंमंत्रा हुंफडंताः स्युर्द्विठांतास्युः स्त्रियो मताः॥ नपुंसका नमोंतास्तु द्विठंस्वाहाएक.
रित्युक्ता मनवस्त्रिधा॥५८॥ शस्तास्ते त्रिविधा मंत्रा वश्यशांत्यभिचारके॥ अग्नीषोमात्म
का मंत्रा विज्ञेयाः क्रूरसौम्ययोः॥५९॥ कर्मणोर्वह्नितारांत्यवियत्प्रायाः समीरिताः॥ आ
२ प्रणव ६
ह

स; व

न्येयामानवाःसौम्याश्चविशेषाद्भुमस्ता[illegible]स्वराः॥६०॥आग्नेयाःसंप्रबुध्यंतेप्राणेचरतिद
क्षिणे॥आग्नेयस्मिंस्थितेप्राणेसौम्याबोधंप्रयांतिच॥६१॥नाडीद्वयगतेप्राणेसर्वे
बोधंप्रयांतिते॥प्रयच्छंतिफलंसर्वेप्रबुद्धामंत्रिणांसदा॥६२॥छिन्नादिदुष्टमंत्रास्तेपा
वयंतिनसाधकं॥छिन्नोरुद्धःशक्तिहीनःपराङ्मुखउदीरितः॥६३॥बधिरोनेत्रहीन
हीनश्चकीलितस्तंभितस्तथा॥दग्धस्त्रस्तश्चभीतश्चमलिनश्चतिरस्कृतः॥६४॥भे
दितश्चसुषुप्तश्चमदोन्मत्तश्चमूर्छितः॥हृतवीर्यश्चहीनश्चप्रध्वस्तोबालकःपुनः॥६५॥कु
मारस्तुयुवाप्रौढोवृद्धोनिस्त्रिंशकस्तथा॥निर्बीजःसिद्धिहीनश्चमंदःकूटस्तथापुनः॥६६॥
निरंशःसत्वहीनश्चकेकरोबीजहीनकः॥धूमि[illegible]तालिंगितौस्यातांमोहितश्चक्षुधार्त्तकः॥६७

---

मायाबीजस्यनामानिमालिनीशिववल्लरी॥वातावर्त्तिःक्रियावाणीबीजंशक्तिश्चकुंडली॥१॥

श्रीरकारांतसंयुक्तंदि
कंवा। व्या[illegible]
यं
आईऊऐश्रौ

अतिदृप्तोंगहीनस्स्यादतिक्रुद्धःसमीरितः॥अतिक्रूरश्चसव्रीडःशांतमानसएवच॥६८॥
स्थानभ्रष्टस्तुविकलःसोतिवृद्धःप्रकीर्त्तितः॥निःस्नेहःपीडितश्चापिवक्ष्याम्येषांचलक्षणं॥
मनोर्यस्यादिमध्यांतेनि[illegible]लंबीजमुच्यते॥संयुक्तंवावियुक्तंवास्वराक्रांतंत्रिधापुनः॥७०
चतुर्धापंचधावापिसमंत्रःछिन्नसंज्ञकः॥आदिमध्यावसानेषुभूबीजद्वंद्वलांछितः॥७१॥रुद्ध
मंत्रःसविज्ञेयोभुक्तिमुक्तिविवर्जितः॥मायात्रितयंश्रीबीजरावहीनश्चयोमनुः॥७२॥[illegible]
[illegible]॥शक्तिहीनःसकथितोयस्यमध्येनविद्यते॥कामबीजंमुखे
मायाशिरस्यंकूंशमेववा॥७३॥असौपराङ्मुखःप्रोक्तोहकारोबिंदुसंयुतः॥आद्यंतमध्येबिंदु
वन्नित्ववेबधिरःस्मृतः॥७४॥पंचवर्णोमनुर्यस्यादिफा[illegible]विवर्जितः॥नेत्रहीनःसविज्ञेयोदुःखशो
कामयप्रदः॥७५॥आदिमध्यावसानेषुहंसप्रासादवा[illegible]ग्भवौ॥हकारोबिंदुमानूजीवीरावंसा फें

सः

ऽकेंऽर
अकोमिकारा॥ ऽंऽःसः

त्रबीजंलमिति
त्रितत्वंश्रीं प्राण
बोवा

स

पिचत्तुःकलं॥७६॥मायानमामिचपदंनास्तियस्मिन्सकीलितः॥एकंमध्येद्वयंमूर्द्धियस्मि
न्नस्त्रपुरंदरौ॥७७॥नविद्यतेयमंत्रस्कस्तंभितःसिद्धिरोधकः॥वह्निर्वायुसमायुक्तोयस्य
मंत्रस्यमूर्द्धनि॥७८॥सप्तधाविद्यतेतंतुदग्धंमन्वीतमंत्रवित्॥अस्त्रंद्वाभ्यांत्रिभिःषड्भिर
ष्टाभिर्दृश्यतेक्षरैः॥७९॥भ्रस्तःसोभिहितोयस्यमुखेनप्रणवस्थितः॥शिवोवाशक्तिरथवाम्री
ताख्यःसप्रकीर्त्तितः॥८०॥आदिमध्यावसानेषुनवैन्मालश्चतुष्टयं॥यस्यमंत्रःसमालिनोमं
त्रविन्नंविवर्जयेत्॥८१॥यस्यमध्येहकारोवाक्रोधोवामूर्द्धनिद्विधा॥अस्त्रंवानिपतितंमंत्रेस्यस
म्यो तिरस्कृतईरितः॥८२॥ह्सौंद्वयंहृदयेशीर्षेवषट्कारीचमध्यतः॥यस्यायौनेहितोमंत्रोःस्त्या
ख्यःसिद्धिषुसूरिभिः॥८३॥त्रिवर्णोदिंस्यवर्णोयःस्तुप्तःसतदाहृतः॥मंत्रोवाप्यथवाविद्या १३
सप्ताधिकदशाक्षरः॥८४॥फट्कारःपंचकाद्योयोमिहोन्मत्तउदीरितः॥नवद्वस्वंस्थितं

हीनोर

---

मध्येयस्यमंत्रःसवहीनितः॥८५॥विरामस्थानगंयस्यहतवीर्यःसकथ्यते॥आदौमध्येतथा
मूर्द्धिचतुरस्त्रयुतोमनुः॥८६॥ज्ञातव्योभीनष्टस्त्येषयस्यादृष्टादशाक्षरः॥एकोनविंशत्य
र्णोवायोमंत्रस्तारसंयुतः॥८७॥हृद्वेखांकुशबीजाद्यस्तंप्रध्वस्तंप्रचक्षते॥सप्तवर्णोभि
तुबालोकुमारोष्टादशाक्षरः॥८८॥षोडशार्णोयुवाप्रौढश्चत्वारिंशल्लिपिर्मनुः॥त्रिंशद
र्णश्चतुष्पष्टिवर्णोमिमंत्रशताक्षरः॥८९॥चतुःशताक्षरश्चापिवृद्धस्याभिधीयते॥नवा
क्षरोध्रुवयुतोमन्तुर्निस्त्रिंशईरितः॥९०॥यस्यावसानेहृदयंशिरोमंत्रोचमध्यतः॥शिखा
वर्मचसंख्यातोवौषट्कारएवच॥९१॥शिवशक्त्यर्णहीनोवामनिर्बीजइवीरितः॥एषु।
स्थानेषुफट्कारषोढायस्मिन्प्रदृश्यते॥९२॥समंत्रःसिद्धिहीनःस्यान्मंदःपंक्त्यक्षरोमनुः
कूटएकाक्षरोमंत्रस्सएवोक्तोनिर्शंकः॥९३॥द्विवर्णःसत्वहीनस्याच्चतुर्वर्णस्तुकेकरः

षडक्षरो बीजहीनस्तु द्विसप्ताक्षरो मतः॥१४॥ सार्धद्वादशवर्णो वा धूमितः सतु निंदितः॥ स्या
द्बीजत्रयस्तद्वदेकविंशतिवर्णकः॥१५॥ विंशद्वर्णस्त्रिंशद्वर्णो यस्यासावालिंगितः स्मृतः॥ द्वा
विंशत्यक्षरो मंत्रो मोहितः परिकीर्तितः॥१६॥ चतुर्विंशतिवर्णो यः सप्तविंशतिवर्णकः॥ क्षु
धार्त्तः सतु विज्ञेयो चतुर्विंशतिवर्णकः॥१७॥ एकादशाक्षरो वापि पंचविंशतिसंख्यकः॥ त्र
योविंशतिवर्णो वा मंत्रो दृप्त उदाहृतः॥१८॥ षड्विंशत्यक्षरो मंत्रः षड्विंशद्वर्णकस्तथा॥ त्रिं
ष्पं शदेकोनवर्णो वांगहीनोभिधीयते॥१९॥ अष्टाविंशत्यक्षरो य एकत्रिंशद्योपि वा॥ अ
तिक्रूरः सकथितो निंदितः सर्वकर्मसु॥२०॥ चत्वारिंशतिमारभ्य त्रिषष्टिर्यावदापतेत्॥
तावत्संख्या निगदिता मंत्राः सव्रीडसंज्ञकाः॥२१॥ पंचषष्ट्यक्षरा ये स्युर्मंत्रास्ते शांतमानसाः १४
एकोनशतपर्यंतं पंचषष्ट्यक्षरादितः॥२२॥ ये मंत्रास्ते निगदिताः स्थानभ्रष्टा कथा बुधैः

त्रयोदशाक्षरा ये स्युर्मंत्राः पंचादशाक्षराः॥३॥ विकलास्ते विधीयंते शतं सार्धशतं तु वा॥ शतद्व
द्व यं चैकनवतिरेकहीनोप्यवापि वा॥४॥ शतत्रयं वा यत्संख्या निःस्नेहास्ते समीरिताः॥ चतुःशतान्य
थारभ्य यावद्वर्णसहस्रकं॥५॥ अतिवृद्धः प्रयोगेषु परित्याज्यः सदा बुधैः॥ सहस्राधिका
पीडिताख्याः मंत्रा दंडकाः परिकीर्तिताः॥६॥ द्विसहस्राक्षरा मंत्राः खंडशः शतधा कृताः॥ ज्ञातव्यास्ते विरूपा
स्ते मंत्रा एते यथाख्यिताः॥७॥ तथा विद्याश्च दोषव्या मंत्रिभिः कार्यकर्मसु॥ दोषानिमानविज्ञा
याय यो मंत्राञ्जपते जडः॥८॥ सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि॥ इत्यादिदोषदुष्टांस्ता
न्मंत्रान्नात्मनियोजयेत्॥९॥ शोधयेद्बुद्धिपूर्वं वा बद्धया योनिमुद्रया॥ मंत्राणां दश कथ्यंते
संस्काराः सिद्धिदायिनः॥१०॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा॥ अथाभिषेको विमलीकर
णाप्यायनं बुधः॥११॥ तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रिया॥ मंत्राणां मातृकामध्यादुद्धृ

रेजननंस्मृतं॥१२॥प्रणवांतरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः॥एतज्जीवनमित्याहुर्मंत्रतंत्रवि
शारदाः॥१३॥मंत्रवर्णान्समालिख्यताडयेच्चंदनांभसा॥प्रत्येकंवायुनामंत्रीताडनंतदुदाहृतं॥१४
विलिख्यमंत्रंतंमंत्रीप्रसूनैःकरवीरजैः॥तन्मंत्राक्षरसंख्यातैर्हन्यात्तेनबोधनं॥१५॥स्वतंत्रोक्त
विधानेनमंत्रीमंत्रार्णसंख्यया॥अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये॥१६॥संचिंत्यमनसामं
त्रंज्योतिर्मंत्रेणनिर्दहेत्॥मंत्रेमलत्रयंमंत्रीविमलीकरणंत्विदं॥१७॥तारंव्योमाग्निमनुयुग्दंडी
ज्योतिर्मनुर्मतः॥कुशोदकेनजप्तेनप्रत्यर्णंप्रोक्षणंमनोः॥१८॥तेनमंत्रेणविधिवदेतदाप्या
यनंमतं॥मंत्रेणवारिणामंत्रेतर्पणंतर्पणंस्मृतं॥१९॥तारमायारमायोगोमनोर्दीपनमुच्य
ते॥जप्यमानस्यमंत्रस्यगोपनंत्वप्रकाशनं॥२०॥संस्कारादशसंप्रोक्ताःसर्वतंत्रेषुगोपिताः
यान्कृत्वासंप्रदायेनमंत्रीवांछितमश्नुते॥२१॥स्वतारराशिकोष्ठेनामनुकूलान्त्यजेन्म

२ १ २ ४ १ १ २ १ २ २: १ २ २ २: १ १ ३ १ ३ १ १ २ २ १:२ ३ १
मन्त्रान्॥प्रापलौनौत्यङःप्राज्येरुङ्येन्योत्रेरुमद्रुकरं॥२२॥लौकलौपपङःप्रायंखरैंलौघौनेदेषुनेदि ति:८
ताः॥वर्णकिमाद्वरांतौतुरेवत्यंशगातौतद्॥२३॥जन्मसंपद्विपत्क्षेमप्रत्येकंसाधकोवधः॥मैत्रं
परममैत्रंचजन्मादीनिपुनःपुनः॥२४॥बौलैंगौरैंखुरैंशौलैंशौमौशौनेतिराशिषु॥क्रमेणात्रेरिता
वर्णकिन्यायांशाद्यस्थिताः॥२५॥लग्नोधनंभ्राताचबंधुपुत्रशत्रुकलत्रकाः॥मरणंधर्मकर्मायि
व्ययाद्वादशराशयः॥२६॥चतुरस्रेलिखेत्पद्मंचतुःकोष्ठसमन्वितं॥अकारादिक्षकारांतान्स्व
रानाद्याक्षरादिकाः॥२७॥सिद्धादीन्कल्पयेन्मंत्रीकुर्यात्सिद्धादिभिःपुनः॥सिद्धादीन्सिद्धिदःसिद्ध
जपात्साध्यःकुलादिभिः॥२८॥सुसिद्धःप्राप्तमात्रेणसाधकंनक्षयेदरिः॥सिद्धार्णबांधवाप्रोक्ता
साध्यास्तेसेवकास्मृताः॥२९॥सुसिद्धापोषकाज्ञेयाःशत्रवोघातकामताः॥दीपस्थानेसमाश्रि
त्यत्तत्कर्मफलप्रदाः॥३०॥चतुरस्रंतुवंतित्वाकोष्ठानांनवकंक्रमात्॥पूर्वकोष्ठादिविलिखेन्मन्त्र
वर्गक्रमान्नु॥३१॥लक्ष्मीशोमध्यकोष्ठेस्वरान्युग्मक्रमाल्लिखेत्॥दिक्षुस्वादितोयत्रहेता

स्वापहरं स्मृतं ॥ ३२ ॥ सुखं न तस्य जानीयाद्दुस्थो दुर्नयनस्थितौ ॥ कोष्टे कुक्षिगते पार्श्वे शीर्षं
पुच्छमीरितं ॥ ३३ ॥ क्रमेणानेन विज्ञेयं मध्यस्थमपि नागतः ॥ सुखस्थो लभते सिद्धिं करस्थः सर्वजीव स्वात्म
नं ॥ ३४ ॥ उदासीनः कुक्षिसंस्थः पार्श्वस्थो दुःखमाप्नुयात् ॥ पुच्छस्थः पीड्यते मंत्री बंधनोच्चाटनादिभिः ॥ ३५
कूर्मचक्रमिदं प्रोक्तं मंत्राणां सिद्धिसाधनं ॥ पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकं ॥ ३६ ॥ तीर्थप्रदेशाः
सिंधूनां संगमः पावनं वनं ॥ उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः ॥ ३७ ॥ देवतायतनं कूलं समु
द्रस्य निजं गृहं ॥ साधनेषु प्रशस्तानि स्थानान्येतानि मंत्रिणां ॥ ३८ ॥ पुरुषार्थसमावाप्त्यै सच्छिष्यो
गुरुमाश्रयेत् ॥ मातृतः पितृतः शुद्धः शुद्धभावो जितेंद्रियः ॥ ३९ ॥ सर्वागमानां सारज्ञः सर्वशास्त्रार्थत
त्ववित् ॥ परोपकारनिरतो जपपूजादितत्परः ॥ ४० ॥ अमोघवचनः शांतो वेदवेदार्थपारगः ॥ योगमा
र्गानुसंधायी देवताहृदयंगमः ॥ ४१ ॥ इत्यादिगुणसंपन्नो गुरुरागमसंमतः ॥ शिष्यः कुलीनः शुद्धात्मा १९
पुरुषार्थपरायणः ॥ ४२ ॥ अधीतवेदः कुशलो दूरमुक्तमनोभवः ॥ हितैषी प्राणिनां नित्यमास्तिक

---

स्त्यक्तनास्तिकः ॥ ४३ ॥ स्वधर्मनिरतो भक्त्या पितृमातृहितोद्यतः ॥ वाङ्मनःकायवसुभिर्गुरु [illegible]
रतः ॥ ४४ ॥ एतादृशगुणोपेतः शिष्यो भवति नापरः ॥ एकाब्देन भवेद्योग्यो ब्राह्मणोऽब्दद्वयान्नृपः ॥
॥ ४५ ॥ वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरोः ॥ शुश्रूषुः परिज्ञाद्यो दीक्षायागव्रतादिषु
॥ ४६ ॥ ॥ ॥ इति श्रीशारदातिलके द्वितीयः पटलः ॥ २ ॥ ॥ ॥ ॥ नवी वक्ष्यामि दी
क्षांगं वास्तुयागपुरःसरं ॥ अनेन येन मंत्रज्ञो दीक्षायाः फलमाप्नुयात् ॥ १ ॥ राक्षसं वास्तुनामा
नं त्वाधिष्ठाय तत्तनुं ॥ स्थिताश्च पंचाशद्देवास्तेभ्यः पूर्वं बलिं हरेत् ॥ २ ॥ बलिमंडलमेतेषां यथा
वदभिधीयते ॥ पूर्वापरायतं सूत्रं विलिखेदृक्षमानसैः ॥ ३ ॥ तन्मध्यात् किंचिदालंब्य मत्स्यौ द्वौ परितो
लिखेत् ॥ तयोर्मध्यस्थितं सूत्रं विन्यसेद्दक्षिणोत्तरं ॥ ४ ॥ द्वाभ्यां द्वाभ्यां तथान्याभ्यां कोणेषु मक
रान्लिखेत् ॥ मत्स्यमध्ये स्थितानाग्राणि तत्र सूत्राणि पातयेत् ॥ ५ ॥ चतुरस्रं भवेत्तत्र चतुष्कोष्ठ
समन्वितं ॥ तत्पुनर्विलिखेन्मंत्री चतुःषष्टिपदं यथा ॥ ६ ॥ ईशानाद्राक्षसो यावद्यावदग्नेः प्रभंजनः

लं२

एवंसूत्रद्वयं दद्यात्कर्णसूत्रं समाहितः ॥७॥ ब्राह्मणं पूजयेद्दोमध्ये कोष्टचतुष्टये ॥ दिक्षु च
पूर्वादि तुष्केषु यजेदर्यमिनं नरं ॥८॥ विवस्वंतं ततो मित्रं महीधरमतः परं ॥ कोणार्द्धकोष्टद्वंद्वेषु वन्ह्या
दिपरितः पुनः ॥९॥ सावित्रं सवितारं च शक्रमिंद्रजयं पुनः ॥ रुद्रं रुद्रजयं विद्वान्नापं चापवत्स
कं ॥१०॥ ततस्तस्मिन्त्रोन्नयतः कोष्टद्वंद्वेषु दैशिकः ॥ स्कंदं गुहं चार्यमाणं जंभकं पिलिपिंछकं
११॥ चरकीं च विदारीं च पूतनामर्चयेत्क्रमात् ॥ अर्चयेद्दिक्षु पूर्वादिष्वाद्यांबदेविमान्
१२॥ अष्टावष्टविभागेन देवान्दैशिकसत्तमः ॥ क्रमादीशानपर्जन्यजयंताः शक्रभास्करौ
१३॥ सत्यो भृशांतरिक्षौ च दिशि प्राच्यामवस्थिताः ॥ अग्निः पूषा च वितथो यमश्च गृहरक्षकः ॥१४ ८
गंधर्वो भृंगराजश्च मृगो दक्षिणदिग्गताः ॥ निर्ऋतिर्दौवारिकश्च सुग्रीवो वरुणस्ततः ॥१५॥ पु १७
ष्पदंतासुरौ शोषरोगौ प्रत्यग्दिशि स्थिताः ॥ वायुर्नागश्च मुख्यश्च सोमो भल्लाट एव चा ॥१६
अर्गलाख्यो दित्यादिती कुबेरस्य दिशि स्थिताः ॥ उक्तानामिति देवानां पद्मान्यापूर्य पंचभिः

१७॥ रक्षोनिस्त्रेधयैतेभ्यो पायसान्नैर्बलिं हरेत् ॥ अयं वास्तुबलिः प्रोक्तो मवर्मिपस्य महिदः ॥१८
नक्षत्रराशिताराणामनुकूले शुभे दिने ॥ ततो त्रमितले शुद्धे तुषांगाररविवर्जिते ॥१९॥ पु
ता ण्याहं वाचयित्वा मंडपं रचयेत्ततं ॥ पंचभिः सप्तभिर्हस्तैर्नवभिर्वापि तांतरं ॥२०॥ षोडशस्तंभ
संयुक्तं चत्वारस्तेषु मध्यमाः ॥ अष्टहस्तसमुच्छ्रायाः संस्थाप्या द्वादशांतिनः ॥२१॥ पंचहस्तप्र
न्न माणैस्तु विच्छिद्राः सैज्ञवः शुभाः ॥ तत्पंचमांशं निखनेन्मेदिन्यां तैश्चत्रैर्वितमः ॥२२॥ नालि
केलैर्दलैर्वंशैश्छादयेच्च समं ततः ॥ द्वारेषु तोरणानि स्युः क्रमाच्छीरमहाफलीं ॥२३॥ स्तंभो
च्छ्रायः स्मृतास्तेषां प्रस्तहस्तैः पृथक्पृथक् ॥ दशांगुलप्रमाणेन तत्परीणाह ईरितः ॥२४
तियकफलकमालं स्यात्स्तंभानामर्द्धमानतः ॥ शूलानि कल्पयेन्मध्ये तोरणे हस्तमानतः ॥ सु
दिक्षु ध्वजान्निबध्नीयात् लोकपालसमप्रभान् ॥ वितानदर्भमालाढ्यैरत्नं कुर्वीत मंडपे ॥२६
नत्रिभागमितिक्षेत्रे निमाचस्तमुन्नतां ॥ चतुरस्रां ततो वेदिं मंडलाय प्रकल्पयेत् ॥२७॥ प्रा

भारद्वा०

गेवह्निस्नादिवमायमलिनिर्वापितैर्दिनैः॥ एवं मंगलसंपन्ने विदध्यादंकुरार्पणं॥२८॥ मंडपस्यो
त्तरे भागे शालां पूर्वापरायतां॥ रुद्रांकुरपत्नि तस्यां मंडलं रचयेत्सुधीः॥२९॥ पंचहस्तप्र
माणानि पंचसूत्राणि पातयेत्॥ पूर्वापरायतान्येषां मंतरं द्वादशांगुलं॥३०॥ दक्षिणोत्तर
सूत्राणि तद्वदेकदशापयेत्॥ पदानि तत्र जायंते चत्वारिंशत्समर्ज्ययेत्॥३१॥ पंक्त्यावीथी
श्च तस्यांतस्तु कोत्रयपार्श्वयोः॥ वीथ्योर्द्वयं च तत्कोष्ठत्रयमत्रावशिष्यते॥३२॥ पदानि
रंजयेत्तानि श्वेतपीतारुणासितैः॥ रजोभिः श्यामलेनाथ वीथीरापूरयेत्सुधीः॥३३॥ पा
त्रि त्राणि विधान्याकुरंकुरार्पणकर्मणि॥ पालिकाः पंच मुख्याः स्युश्च शरावाश्च चतुःक्रमात् १८
प्रोक्तास्तुः सर्वतंत्रज्ञैर्द्विबिलाग्निवासकाः॥ एषामुत्सेधस्तु त्रेधः षोडशद्वादशाष्टभिः॥३४॥
अंगुलैः क्रमशः स्तानि सूत्रान्यावेष्ट्य तंतुना॥ प्रक्षाल्य देशिकस्तेषु पदेष्वाहितशालिषु॥
३५॥ सुगंधिदर्भकूर्चेषु पश्चिमादि निवेशयेत्॥ करीषवालुकामृद्भिस्तानि पात्राणि पूरयेत्॥३६

---

वाल

सुधावीतेन बीजानि दुग्धैः प्रक्षाल्य तं च वित्॥ जलमंत्राभिजप्तानि पंचघोषपुरःसरं॥३८॥ आशी
र्वाभिर्द्विजातीनां मंगलाचारपूर्वकं॥ निक्षिपेत्तेषु पात्रेषु देशिको यतमानसः॥३९॥ शालि
उ९र श्यामाढकीमुद्गतिलनिष्पावसर्षपाः॥ कुलत्थकं सुमाषाश्च बीजान्यंकुरकर्मणि॥४०॥ सलिला
द्भिः समभ्युक्ष्य वस्त्रैराच्छाद्य देशिकः॥ बलिं त्रिविधपात्राणां दिक्षु पूर्वादितः क्षिपेत्॥४१॥ प्रण
वाद्यैर्नमोंतैश्च रात्रौ रात्रीशनामभिः॥ भूतानि पितरो यक्षा नागा ब्रह्मा शिवो हरिः॥४२॥ मात्रा
नामपि रात्रीणां देवताः समुदीरिताः॥ एतेभ्यः स्युर्लाजतिला हरिद्रादधिसक्तवः॥४३॥ मा
षाः पिच्छ्यः सतिलास्तंडुलाः परिकीर्तिताः॥ करंभलाजापृथुकान्यो नारिकेरोदकान्वितं॥४४ लि
सक्तुपिष्टं च नागेभ्यो ब्रह्मणे पंकजान्हुतं॥ पायसमंत्रेशवपि विष्णवे स्यात्कुडोदनं॥४५
ततो लोकेश्वरेभ्योपि विधिवद्दितरे बलिं॥ द्वाद्वायामभिषेके पुनर्वेश्मप्रवेशने॥४६॥ स
र्वमंगलसंपन्ने विदध्यादंकुरार्पणं॥ प्राक्प्रोक्ते मंडपे विद्वान्वेदिकाया बहिस्त्रिधा॥४७॥

क्षेत्रं विभज्य मध्ये शं पूर्वादि परिकल्पयेत्॥ अष्टास्वाशासु कुंडानि रम्याकाराणि कल्पयेत्॥४८॥
चतुरस्रं योनिमर्धचंद्रं त्र्यस्रं सुवर्त्तुलं॥ षडस्रं पंकजाकारमष्टास्रं तानि नामतः॥४९॥ आचार्य
कुंडमध्ये स्याद् गौरीपतिमहेंद्रयोः॥ हस्तमात्रमितां भूमिं पूर्ववत्परिकल्पयेत्॥५०॥ समंतात्कुं
डमितं स्याच्चतुरस्रं शुभावहं॥ चतुर्विंशत्यंगुलाढ्यं हस्तं तं च विदो विदुः॥५१॥ कर्तुर्दक्षिणह
स्तस्य मध्यमांगुलिपर्वणः॥ मध्यस्य दीर्घमानेन मानांगुलमितीरितं॥५२॥ यवानामष्टभि
र्न्यूनं मात्रांगुलमिति स्मृतं॥ चतुरस्रीकृतं क्षेत्रं पंचधा विभजेत्सुधीः॥५३॥ न्यसेत्तेन चतुरस्रार्द्
कांशं कोणार्द्धप्रमाणतः॥ भ्रामयेत्कोणमानेन तथान्यदपि मंत्रवित्॥५४॥ सूत्रयुग्मं ततो
दद्यात्कुंडं योनिमिमं भवेत्॥ चतुरस्रीकृतं क्षेत्रं दशधा विभजेत्सुधीः॥५५॥ एकमेकं त्यजेद्दि
शमधऊर्ध्वं चैवं त्रिवित्॥ स्यात्सूत्रं पातयेत्तेन तन्मानाद्भ्रामयेत्ततः॥५६॥ अर्द्धचंद्रनिभं कुं
डं रमणीयमिदं भवेत्॥ चतुर्धा विहिते क्षेत्रे न्यसेदुभयपार्श्वयोः॥५७॥ एकैकमंशं तन्मानाद्भ्र

तोलांछयेत्ततः॥ सूत्रयुग्मं बुधः कुर्यात्त्र्यस्रं कुंडमुदाहृतं॥५८॥ अष्टादशांशे क्षेत्रे शं त्यजेदे
कं बहिर्बुधः॥ भ्रामयेत्तेन मानेन वृत्तं कुंडमनुत्तमं॥५९॥ अष्टधा विभजेत्क्षेत्रं मध्यसू
त्रस्य पार्श्वयोः॥ भागं त्यजेदेकमेकं मानेनानेन मध्यतः॥६०॥ कुर्यात्पार्श्वयुगमस्य च
तुष्कं तत्र विभ्रमः॥ सूत्रं षट्कं ततो दद्यात्षडस्रं कुंडमुत्तमं॥६१॥ चतुरस्रीकृतं क्षेत्रं विभ
ज्याष्टादशांततः॥ एकभागं बहिर्न्यस्य भ्रामयेत्तेन वर्त्तुलं॥६२॥ वृत्तानि कर्णिकादीनां ब
हिस्त्रीणि प्रकल्पयेत्॥ पद्मकुंडमिति प्रोक्तं विलोचनमनोहरं॥६३॥ पूर्वोक्ते विभजेत्क्षेत्रं
चतुर्विंशतिभागतः॥ एकं भागं बहिर्न्यस्य चतुरस्रं प्रकल्पयेत्॥६४॥ अंतस्थचतुरस्रस्य
कोणार्द्धप्रमाणतः॥ बाह्यस्थचतुरस्रस्य कोणेन्यां परिलांछयेत्॥६५॥ दिशां प्रति यथा
न्यापमध्योत्थ त्रालिपानयेत्॥ अष्टास्रं कुंडमेवं हि तत्र विद्भिरुदारितं॥६६॥ यावान्कुंडस्य
विस्तारः खननं तावदीरितं॥ कुंडानां यादृशं रूपं मेखलानां च तादृशं॥६७॥ कुंडानां मेखला

स्तिस्रो मुष्टिमात्रे तु ताः क्रमात्॥ उच्छ्रायायामतो ज्ञेया ह्येकार्द्धांगुलसम्मिताः॥६८॥ अरत्निमात्रे
कुंडे स्युस्तास्त्रिद्व्येकांगुलात्मिकाः॥ एकहस्तमिते कुंडे वेदाग्निनयनांगुलाः॥६९॥ मेखला
नां न वेदंतः परितो नेमिरंगुलात्॥ एकहस्तस्य कुंडस्य वर्द्धयेत्तं क्रमात्सुधीः॥७०॥ दशहस्तांतम
न्येषामर्द्धांगुलवशात्स्वयं॥ कुंडे द्विहस्ते ता ज्ञेया रसवेदगुणांगुलाः॥७१॥ चतुर्हस्ते च
कुंडे ता वसुतर्कयुगांगुलाः॥ कुंडे रसकरे तास्तु दशाष्टवेदांगुलान्विताः॥७२॥ वसुहस्तमि
ते कुंडे भानुपंक्त्यष्टकांगुलाः॥ दशहस्तमिते कुंडे मनुभानुदशांगुलाः॥७३॥ विस्तारो मे
धतो ज्ञेया मेखलानां सर्वतो बुधैः॥ हेतु रम्यं योनिमानं सुपर्यश्विच्छपत्रवत्॥७४॥ मुष्ट्यर
त्न्येकहस्तानां कुंडानां योनिरीरिता॥ षट्चतुर्द्व्यंगुलायामविस्तारोन्नतिशालिनी॥७५॥
एकांगुलं तु योन्यग्रं कुर्यादिषदधोमुखं॥ एकैकांगुलतो योनिं कुंडेष्वन्येषु वर्द्धयेत्॥७६॥
यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत्॥ स्थलाधारन्यनालं स्याद्योन्यामध्ये मरंध्रकं॥७७॥

२०

नापयेत्कुंडकोणेषु योनिं तां तं च विक्रमः॥ कुंडानां कल्पयेदंतर्नाभिमंबुजसन्निभं॥७८॥ तत्तत्कुं
डानुरूपं वा मानमस्य निगद्यते॥ मुष्ट्यरत्न्येकहस्तानां नाभिरुत्सेधतारतः॥७९॥ नेत्रवेदांगुलो
पेता कुंडेष्वन्येषु वर्द्धयेत्॥ यवद्वयक्रमेणैव नाभिं ष्टयगुहारधीः॥८०॥ योनिकुंडे योनिमब्ज
कुंडे नाभिं विवर्जयेत्॥ नाभिच्छेदं त्रिधा कृत्वा मध्ये कुर्वीत कर्णिकां॥८१॥ बहिरंशद्वयेना
ष्टौ पत्राणि परिकल्पयेत्॥ मुष्टिमात्रमिदं कुंडं शतार्द्धे संप्रचक्ष्यते॥८२॥ शतहोमेरत्निमात्रं हस्तमा
त्रं सहस्रके॥ द्विहस्तमयुते लक्षे चतुर्हस्तमुदीरितं॥८३॥ दशलक्षेषु षड्हस्तं कोट्यामष्टक
रं स्मृतं॥ एकहस्तमितं कुंडं एकलक्षे विधीयते॥८४॥ लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत्
॥ दशहस्तमितं कुंडं कोटिहोमे प्रशस्यते॥८५॥ सर्वसिद्धिकरं कुंडं चतुरस्रमुदाहृतं॥ पुत्रप्र
दं योनिकुंडमर्द्धचंद्रं शुभप्रदं॥८६॥ शत्रुक्षयकरं त्र्यस्रं वर्त्तुलं शांतिकर्मणि॥ छेदमारण
योः कुंडं षडस्रं पद्मसन्निभं॥८७॥ वृष्टिदं रोगशमनं कुंडमष्टास्रमीरितं॥ विप्राणां चतुर

त्रं स्याद्वाग्नौ वर्तुलमिष्यते ॥८८॥ वैश्यानामर्धचंद्राभं शूद्राणां त्र्यस्रमीरितं ॥ चतुरस्रं तु सर्वेषां
केचिदिच्छंति तांत्रिकाः ॥८९॥ कुंडस्य स्तूपगनीयात्परमंत्रज्ञतेर्वस्तुः ॥ प्राच्यां शिरः समाख्यातं
बाहू दक्षिणसौम्ययोः ॥९०॥ उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे ॥ नित्यं नैमित्तिकं होमं स्थं
डिले वा समाचरेत् ॥९१॥ हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभनं ॥ चतुरंगुलोत्सेधमंगुलं
चतुरस्रं समंततः ॥९२॥ एवं प्रोक्तानि कुंडानि कथ्यते स्रुक्स्रुवौ पुनः ॥ प्रकल्प्यं स्रुक्च यागे वक्ष्यमाणे ये
न वर्त्मना ॥९३॥ श्रीपर्णीशिंशपाक्षीरशाखिविकंकतमं गुरुः ॥ ग्रहीत्वा विनगे हस्तमात्रं षड्विंशतांगुलैः
॥९४॥ विंशत्यंशेन वे दंडो वेदिस्तैरष्टभिर्भवेत् ॥ एकांशेन मितः कंठः पंचभागमितं मुखं ॥९५॥ वेदि
त्र्यंशेन विस्तारः कंठस्य परिकीर्तितः ॥ अग्रं कंठसमानं स्यात्मुखे भागं प्रकल्पयेत् ॥९६॥ कनिष्ठां २१
गुलिमानेन स्यापिषोनिगमायच ॥ वेदिमध्ये विधातव्यात्रागेनैकेन कर्णिका ॥९७॥ विदधीत
बहिस्तस्याएकांशेनान्वितावटं ॥ तस्य खातं त्रिभिर्भागैर्वृत्तमर्धांशतो बहिः ॥९८॥ त्र्यंशेनैके

नपरितो दलानि परिकल्पयेत् ॥ मेखलामुखवेधः स्यात्परितोर्धांशमानतः ॥९९॥ दंडमूलाग्रयोः
कुंभौ गुणवेदांगुलैः क्रमात् ॥ गंडीयुग्मं यमांशे स्याद्दंडस्यानाह ईरितः ॥१००॥ षड्भिरंशैः पृष्ठभा
गो वेधाः कमलाकृतिर्भवेत् ॥ दंडस्य वा हस्तिनो वा पोत्रिणो वा मुखं लिखेत् ॥१॥ मुखस्य पृष्ठभाग
स्याः संप्रोक्तं लक्षणं स्रुवः ॥ स्रुक्चतुर्विंशतिभिर्भागैः शरचयेत्स्रुवं ॥२॥ वो विस्तारदंडमानमशीरे
तस्य कीर्तितं ॥ चतुर्विंशो रानाहः कषाप्रमाहितच्छिरः ॥३॥ त्र्यंशार्धयेन निखनेत्संके स्रगप
कृतिः ॥ दंडमूलाग्रयोर्गंडी न वेत्कंकणभूषिता ॥४॥ स्रुक्स्रुवस्य विधिः ख्यातः कीर्त्यंते मंडलान्यथ ॥
चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते ॥५॥ चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयं ॥ मध्ये मध्ये
यथा मत्स्या भवेयुः पातयेत्तथा ॥६॥ पूर्वापरायते वेदे मंत्री याम्योत्तरायते ॥ पातयेत्तेषु मत्स्येषु
समं सूत्रचतुष्टयं ॥७॥ पूर्ववत्कोणकोष्ठेषु कर्णसूत्राणि पातयेत् ॥ तदुक्तेषु मत्स्येषु दद्यात्सूत्रचतु
ष्टयं ॥८॥ यावद्व्रजत्ययं मंत्री पदं चाशत्पदान्यपि ॥ तावत्तेनैव विधिना तत्र सूत्राणि पातयेत् ॥९॥

षड्विंशतपदैर्मध्ये लिखेत्पद्मं सलक्षणं ॥ बहिः पंक्त्या त्यजेत्पीठं पंक्तियुग्मेन वीथिका ॥१०॥ द्वारशो
भोपशोभाढ्यं शिष्टाभ्यां परिकल्पयेत् ॥ शास्त्रोक्तविधिना मंत्री ततः पद्मं समालिखेत् ॥११॥ पद्मक्षे
त्रस्य संत्यज्य षोडशांशं बहिः सुधीः ॥ तन्मध्ये विभजेद्वृत्तैस्त्रिभिः समविभागतः ॥१२॥ आद्यं स्या
त्कर्णिकास्थानं केसराणां द्वितीयकं ॥ तृतीयं तत्र पत्राणाम्मुक्तांशेन दलात्मकं ॥१३॥ बाह्यवृत्तां
तरालस्य मानं यद्विधिना सुधीः ॥ निधाय केसराग्रेषु परितो द्वीनिशाकरान् ॥१४॥ लिखित्वा सं
धिसंस्थानि तत्र सूत्राणि पातयेत् ॥ दलाग्राणां च यन्मानं तन्मानं वृत्तमालिखेत् ॥१५॥ तद
तरालं तन्मानं ध्यस्त्रवस्योन्नयतः सुधीः ॥ आलिखेद्बाह्यवृत्तेन दलाग्राणि समंततः ॥१६॥ द
लमूलेन युगशः केसराणि प्रकल्पयेत् ॥ एतत्साधारणं प्रोक्तं पंकजं तंत्रवेदिभिः ॥१७॥ पदानि
त्रीणि पाद्यार्थं पीठकोणेषु मार्जयेत् ॥ अवशिष्टैः पदैर्विद्वान्पीठगात्राणि कल्पयेत् ॥१८॥ पदानि वी
थिसंख्यानि मार्जयेत्संत्यजेदतः ॥ दिक्षु द्वाराणि रचयेद्विचतुःकोष्टकैस्ततः ॥१९॥ पादैस्त्रि

२१

भिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः ॥ उपशोभास्युरेकेन त्रिभिः कोष्ठैरनंतरं ॥२०॥ अव
शिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयं ॥ रंजयेत्पंचभिर्वर्णैर्मंडलं तन्मनोहरं ॥२१॥ पीतं
हरिद्राचूर्णं स्यात्सितं तंडुलसंभवं ॥ कुसुंभचूर्णमरुणं कृष्णं दग्धपुलाकजं ॥२२॥ बिल्वा
दिपत्रकं श्याममित्युक्तं पंचवर्णकं ॥ अंगुलोत्सेधविस्ताराः सीमाश्चैषाः सिताः शुभाः ॥२३
कर्णिका पीतवर्णेन केसराण्यरुणानि ॥ शुक्लवर्णेन पत्राणि तत्संधिः श्यामलेन च ॥२४॥ रज
सा रंजयेत्सोमनीय वा पीतैव कर्णिका ॥ केसराः पीतवर्णास्युररुणानि दलानि च ॥२५॥
संधयः कृष्णवर्णाः स्युः पीतेनाप्यसितेन वा ॥ रंजयेत्पीठगात्राणि पादास्युररुणासिताः
गात्राणि तस्य शुक्लानि वीथासु च चतस्टपु ॥ आलिखेत्कल्पलतिका दलपुष्पफलान्विताः
वर्णैर्नानाविधैश्चित्रैः सर्वदृष्टिमनोहरैः ॥ द्वाराणि श्वेतवर्णानि शोभारक्ताः समीरिताः ॥२८॥

उपशोभाःपातवर्णाःकोणान्यसितभांसिच ॥ तिस्रोरेखाबहिःकुर्यात्सितरक्तासिताः
क्रमात् ॥२५॥ मंडलंसर्वतोभद्रंसर्वसाधारणंमतं ॥ चतुरस्रंध्रुवंकृत्वादिग्भ्योद्वादश
धासुधीः ॥ पातयेत्तत्रसूत्राणिकोष्ठानांदृश्यतेशतं ॥ चतुश्चत्वारिंशदाढ्यंपश्चात्षट्त्रिं
शतांबुजं ॥ कोष्ठैःप्रकल्पयेत्पीठंपंक्त्यानैवात्रवीथिका ॥ द्वारशोभेयथापूर्वंउपशोभान
दृश्यते ॥ अवशिष्टैःपदैःकुर्यात्षड्भिःकोणानिमंत्रवित् ॥ विदध्यात्पूर्ववच्छेषमेवंवामंडलंशु
भं ॥ चतुरस्रेचतुःषष्टिपदान्यारचयेत्सुधीः ॥ पदैश्चतुर्भिःपद्मंस्यात्मध्येतत्परितःपुनः ॥ वी
थीश्चतस्रःकुर्वीतमंडलांतावसानिकाः ॥ दिग्गतेषुचतुष्केषुपंकजानिसमालिखेत् ॥ वि
दिग्गतचतुष्कानिनित्वाषोडशभिःसुधीः ॥ मार्जयेत्स्वस्तिकाकारंश्वेतपीतारुणासितैः ॥ र
जोभिःद्वारयेत्तानिस्वस्तिकानिशिवादितः ॥ प्राक्प्रोक्तेनैवमार्गेणशेषमन्यत्समापयेत् ।